


SRI CHAMARAJENDRA SANSKRIT COLLEGE
LIBRARY
Class N.58 68 Ac. No. 364
Author
Title -ವೃಷಭೇಂದ್ರವಿಜಯ.

Lent	Returned	Lent	Returned	Lent	Returned
22 1/64	7 3/64				

SRI CHAMARAJENDRA SANSKRIT COLLEGE
LIBRARY

This book was loaned on the last date mentioned below and it is returnable within a fortnight therefrom unless the loan is renewed.

1641-36 B P.

N-2080

॥ मायावादखंडनटीकाप्रारंभः ॥ 816

श्रीमद्भनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः । नरसिंहमसह्योरुप्रत्यूहतिमिरापहं । प्रणिपत्य व्याकरिष्येमायावादस्यखंडनं ॥ इहहिविविधसांसारिकदुःखदर्शनेनविरक्तस्यशमदमादिमतोमुमुक्षोरधिकारिणस्तन्निवृत्त्यै परमानंदावाप्त्यैचसकलजीवजडात्मकात्प्रपंचात्परमार्थतएवात्यंतभिन्ननिखिलगुणोदारंनिरस्तसमस्तदोषंपरब्रह्मप्रतिपादयितुं सकलश्रुतिस्मृतीनांतदुपकरणभूतब्रह्ममीमांसायाश्चप्रवृत्तिरितितत्वं । अपरेतुस्वतःपरब्रह्मभूतस्यैवजीवस्याज्ञाननिमित्तंदुःखादि तदद्वैतज्ञाननि(बर्हणीय)वर्तनीयमित्यतोनर्थहेतोरस्यप्रहाणायात्मैकत्वविद्याप्रतिपत्तयेसर्वशास्त्रारंभइतिवर्णयंति । तन्मतमपाकृत्यस्वमतंसमर्थयितुमिदंप्रकरणमारभमाणोभगवानाचार्यःपरममंगलंनरसिंहस्तवनमादावाचरति ॥ **नरसिंहो खिलाज्ञानमतध्वांतदिवाकरः । जयत्यमितसज्ञानसुखशक्तिपयोनिधिः ।** अखिलंचैतन्यमात्रातिरिक्तं अज्ञान(परिक)कल्पितमितियन्मतंतदेवध्वांतमिवसम्यग्ज्ञानप्रतिरूपत्वात् । तन्निरसनेदिवाकरइव । जयत्युत्कृष्टोवर्तते । तथाचोक्तं । जयेर्जयाभिभवयोराद्येर्थेसावकर्मकः । उत्कर्षप्राप्तिराद्योर्थोद्वितीयेर्थेसकर्मकइति । सत्त्वंज्ञानसुखशक्तीनांविशेषणं । ज्ञानस्ययथार्थत्वं(सत्वं)। सुखस्यदुःखासंभिन्नत्वं । शक्तेरप्रतिबद्धता। ताभिःपयोनिधिरिव । पयोनिधिःपरिमितोभवतीत्यतस्तममितत्वेनविशिनष्टि । द्विविधःखलुपुरुषार्थोऽनिष्टनिवृत्तिरिष्टप्राप्तिश्च । तत्राखिलेतिमायावादादिदुर्मतप्रसंजितमिथ्याज्ञानाद्यनिष्टनिवर्तकत्वेननरसिंहस्तुतिर्विहिता । अमितेतिसम्यग्ज्ञानादिसमस्तेष्टसंपादनसमर्थत्वेनेति ॥ अखिलाज्ञानमतंध्वांतसममित्येतदसहमानआह। जीवब्रह्मणोरेकत्वंहिश्रुतितन्मीमांसाभिस्तात्पर्यतःप्रतिपाद्यते।नचैतच्चैतन्यातिरिक्तस्याखिलस्याज्ञानकल्पिततयाविनोपपद्यते । तत्कथमेवमुच्यतइति । मैवं । स्यादेतदेवंयदिजीवब्रह्मणोरैक्यप्रतिपादकत्वंवेदतन्मीमांसयोरुपपन्नंस्यात् । नचैतदस्ति । तत्परतयाव्याख्यानेवेदादेरनारंभणीयत्वप्रसंगात् । तत्कथमितितत्राह ॥ **विमतमनारंभणीयं । अन्यथाप्रतिपादकत्वात् । यदित्थंतत्तथायथासंप्रतिपन्नं ॥** ॥ विमतमारंभणीयत्वानारंभणीयत्वाभ्यांविमतिविषयीभूतंश्रुतितन्मीमांसाशास्त्रं । शास्त्रमनारंभणीयमित्येवोक्तेबौद्धादिशास्त्राणामनारंभणीयत्वस्यपरेणाभ्युपगतत्वादिष्टापादनमेतत्स्यात् । तर्हिवेदादीत्येवोच्यतां । मैवं । विमतिग्रहणेननिराश्रयत्वादिदोषपरिहारस्यापिसूचितत्वात् । एवमापाद्यवैकल्यादिदोषपरिहारसूचनाययथासंप्रतिपन्नमित्युक्तं । अन्यथायथाबौद्धादिशास्त्रमितिब्रूयात् । नन्वनारंभणीयत्वंनामाऽप्रणेतव्यत्वंवाअश्रोतव्यत्वादिकंवा । आद्येत्विष्टापादनं । वेदस्याप्रणेतव्यत्वात् । नद्वितीयः । बौद्धादिशास्त्रश्रवणस्यापिदर्शनात् । मैवं । प्रेक्षावदुपादेयत्वाभावस्यविवक्षितत्वात् । स्यादितिप्रतिज्ञावाक्यशेषः । तथाचयदिवेदादिकंजीवब्रह्मणोरैक्यप्रतिपादकंस्यात्तदानारंभणीयंप्रसज्येतेत्युक्तंभवति । आपादकमेवान्यथाप्रतिपादकत्वादित्यनेनहेतुवाक्येनविरियतइत्यदोषः । तच्चोत्तरत्रप्रदर्शयिष्यामः । अथवावेदतन्मीमांसादिकंऐक्यपरतयाव्याकुर्वन्मायावादिप्रणीतंशास्त्रमेवपक्षीकृत्यतस्यानारंभणीयत्वंवेदादेस्तत्परत्वनिरासायसाध्यते। कथमन्यथाप्रतिपादकत्वंविमतस्यशास्त्रस्येत्यतआह ॥ **नहिब्रह्मात्मैक्यस्ययाथार्थ्यंतत्पक्षे ॥** ॥ अन्यथाप्रतिपादकत्वंह्ययथार्थप्रतिपादकत्वं । ब्रह्मात्मनोरेकत्वंचशास्त्रविषयतयापरस्याभिमतंनतत्परमार्थभूतं । अतोन्यथाप्रतिपादकत्वंसिद्धं । ननुयद्यद्वैतपरंशास्त्रंस्यात्तदानारंभणीयंप्रसज्येतेतिप्रसं

गोक्तावापादकस्योक्तत्वात्पुनर्हेत्वभिधानंव्यर्थंस्यात्। नचैतदेवापादकाभिधानमितिवाच्यं। तथासत्यन्यथाप्रतिपादकत्वादित्य
स्यब्रह्मात्मैक्यप्रतिपादकत्वादित्यर्थःस्यात्। तथाचदृष्टांतानुपपत्तिः । नहिब्रह्मात्मैक्यस्येत्युपपादनानुपयोगोसंगतत्वंचेति ।
मैवं। अभिप्रायसद्भावात् । तथाहि । यद्यद्वैतमेवशास्त्रार्थःस्यात्तदाशास्त्रमनारंभणीयंस्यादित्युक्तेनिमित्तनैमित्तिकभावस्या
स्फुटत्वात्कथमित्याकांक्षायामन्यथाप्रतिपादकत्वादित्युक्तं । यदिशास्त्रार्थोऽद्वैतंस्यात्तदाशास्त्रमन्यथाप्रतिपादकंस्यात् । तत
श्चानारंभणीयंप्रसज्येतेति। अद्वैतस्यैवशास्त्रार्थत्वेशास्त्रस्यायथार्थप्रतिपादकत्वंकथमित्यतोनहिब्रह्मात्मैक्यस्येत्यभिहितं । तत्रो
पपत्तिस्तत्पक्षइति । ऐक्यमेवशास्त्रार्थश्चेद्ब्रह्मातिरिक्तंसर्वमपरमार्थभूतंस्यात्। ऐक्यंचब्रह्मव्यतिरिक्तत्वादपरमार्थभूतं। तत्प्रति
पादकंचशास्त्रंकथमन्यथाप्रतिपादकंनभवेदिति। अथब्रह्मात्मैक्यंतत्स्वरूपातिरिक्तमपिपरमार्थसदंगीक्रियतेतदातेनैवद्वैतापत्ते
रद्वैतपरंशास्त्रमित्यस्यहानिःस्यादित्याह ॥ **अद्वैतहानेःस्वरूपातिरेके**। ब्रह्मात्मैक्यस्येतिवर्तते । याथार्थ्येसतीतिशेषः । स्यादे
तदैक्यंपरमार्थसदेवकिंतुब्रह्मस्वरूपानतिरिक्तमेव। यथाह । तच्चाद्वैतंब्रह्मैवेदंसर्वमितिश्रुत्यर्थेनसहैक्यमापन्नंहिब्रह्मैवस्यादिति।
तथाचकथंतत्प्रतिपादकंशास्त्रमयथार्थप्रतिपादकंस्यादित्यतआह ॥ **अनतिरेकेस्वप्रकाशत्वादात्मनःसिद्धसाधनता** ॥
शास्त्रस्येतिशेषः। यद्यद्वैतंब्रह्मस्वरूपानतिरिक्तंस्यात्तदाशास्त्रस्यसिद्धार्थबोधकत्वंप्रसज्येत। बोध्यस्यात्मनोब्रह्मस्वरूपत्वात्तस्यच
स्वप्रकाशत्वेननित्यसिद्धत्वात् । अतःसिद्धसाधनतापरिहारायैक्यस्यस्वरूपातिरेकेंगी(कार्येऽन्य)क्रियमाणेऽन्यथाप्रतिपादक
त्वमेवेति । अयंचदोषःस्वमतरीत्यैवोक्तइतिमंतव्यं । स्वविषयप्रकाशत्वंस्वप्रकाशत्वमितिस्वमतेंगीकारात् । पररीत्यातुस्वप्र

काशत्वादात्मनःशास्त्रस्याप्रतिपादकत्वंस्यात् । अवेद्यत्वंस्वप्रकाशत्वमित्यंगीकारादितिदूषणंद्रष्टव्यं । ननुस्वप्रकाशतयात्म
स्वरूपस्यसिद्धत्वेप्यद्वैतादिविशेषाकारेणानधिगतत्वान्नशास्त्रस्यसिद्धसाधनत्वादिकं । यथाखलुभवतांगुणगुणिनोरभेदेपिगु
णिनःस्पर्शनेनोपलंभेरूपस्यानधिगतिरेवमित्यतआह ॥ **निर्विशेषत्वादात्मनोनानधिगतोविशेषः** ॥ स्यादेवंघटोपलंभे
पितद्रूपानुपलब्धिःयतोरूपंघटाभिन्नमपितद्विशेषतयांगीक्रियतेनतुतन्मात्रं। नचै(वमै)क्यमपिआत्माभिन्नंतद्विशेषः । येनआ
त्मनिसिद्धेप्यनधिगतइतियुक्तं । आत्मस्वरूपस्यनिर्विशेषत्वांगीकारादिति । अथापिस्यात् । भवेदिदंशास्त्रस्यसिद्धसाधनत्वा
दियदिशास्त्रंसाक्षादद्वैतंप्रतिपादयतीतिब्रूमः । नचैवं । किंनामावरणभूताज्ञानमात्रंनिवर्तयतीति । निवृत्तेत्वावरणेऽद्वैतंस्वत
एवसिद्धं । तदुक्तं । सिद्धंतुनिवर्तकत्वादिति । तत्राह ॥ **सिद्धत्वात्स्वरूपस्यविशेषाभावाच्चनाज्ञानंकस्यचिदावरकं** ।
स्यादेवंशास्त्रस्यसिद्धसाधनतापरिहारःयदिपरमतेअज्ञानमावरणंसंभवेत् । नचैतत्संभवति । आवरणंह्याव्रियमाणेनव्याप्तं ।
नचाज्ञानस्यतदस्ति । तथाहि। किमज्ञानमात्मस्वरूपस्यावरणंस्यादुततद्विशेषस्य। नाद्यः । तस्यस्वप्रकाशत्वेननित्यसिद्धत्वात्।
नद्वितीयः। तदभावात्। तथाचव्यापकाभावाद्व्याप्यमावरणमपिनसंभवतीतिनतन्निवर्तकत्वेनशास्त्रस्यासिद्धसाधनत्वंभवतीति।
अस्तुतर्हिसिद्धसाधनता । शास्त्रस्यकोदोषइतिचेत् । परार्थत्वाच्छास्त्रस्य परसिद्धबोधनेऽनुपादेयत्वंस्यादित्येकः । अपरंचाह
॥ **अनधिगतार्थगंतृप्रमाणमितिचतन्मतं** । गंतृशब्देनावगतिसाधनमुच्यते । अनधिगतेतिस्मृत्यादि(व्यवच्छेदार्थं)
व्युदासार्थं । शुक्तिरजतादिज्ञाननिरासायार्थग्रहणं । (अर्थस्यचयथावस्थितस्यविवक्षितत्वात् ।)अर्थस्यफलस्यचनिवृत्त्यर्थंगंतृ

पदं । तस्यचसाधनपरत्वान्नकर्तर्यतिप्रसंगः । एतद्भाट्टानांप्रमाणलक्षणं । व्यवहारेभट्टनयइतिमायावादिभिरंगीकारात्तन्मतमि त्युक्तं । यदिशास्त्रमधिगतमेवार्थमवगमयेत्तदाप्रमाणलक्षणाभावादप्रमाणंप्रसज्येतेति । एवमयथार्थपरत्वमन्यथाप्रतिपादक त्वमित्यभिप्रेत्योपपादितं । अधुनाविषयप्रयोजनादिरहितत्वमन्यथाप्रतिपादकत्वमभिप्रेत्यतत्सिध्यर्थंपराभिमतंशास्त्रस्यविष यादिकंपरन्यायेनापाकरोति ॥ **अज्ञानासंभवादेवतन्मतमखिलमपाकृतं** । तन्मतंतदभिमतंअखिलंविषयादिकमपा कृतंवेदितव्यं । कथं । उक्तप्रकारेणैवतन्मतेऽज्ञानासंभवाद्विषयादेश्चाज्ञानसापेक्षत्वात् । अज्ञातोहिविषयोभवति । अन्यथाति प्रसंगादिति । एवमज्ञानासंभवेनविषयंनिराकृत्यप्रकारांतरेणनिराचष्टे ॥ **मिथ्यात्वेचैक्यस्यातत्वावेदकत्वमागम स्यस्यात्** । ऐक्यंहिशास्त्रस्यविषयतयापरस्याभिमतं । तत्किमात्मस्वरूपातिरिक्तंउततन्मात्रं । आद्ये(पि)सत्यंमिथ्या वा । नाद्यः । अद्वैतहानिप्रसंगात् । नद्वितीयः । ऐक्यस्यमिथ्यात्वेतत्प्रतिपादकस्यशास्त्रस्यातत्वावेदकत्वंस्यात् । तथाचापसिद्धांतःस्यात् ॥ किंच ॥ **सत्यताचभेदस्य** । परस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरविधिनाव्याप्तत्वादै क्यस्यमिथ्यात्वेभेदस्यसत्यताचस्यात् । अतऐक्यमात्मस्वरूपमेवेत्यंगीकार्यं । स्वरूपस्यचस्वप्रकाशत्वेननविषयतासंभव तीति । पूर्वमनतिरेकपक्षप्रतिषेधेनातिरेकपक्षमंगीकार्यायथार्थप्रतिपादकत्वंसमर्थितं । इदानींतुतद्विपर्ययेणविषयत्वाभा वप्रतिपादनमितिभेदः । एवंविषयंनिराकृत्यप्रयोजनंनिराकरोति ॥ **एवमेवप्रयोजनमपिनिरस्तं** । यथाअज्ञानासं भवादज्ञातस्यविषयस्यासंभवोऽद्वैतवादे एवमेवाज्ञानासंभवादेवशास्त्रस्यप्रयोजनमपिनिरस्तंवेदितव्यं । मोक्षोहिप्रयोजनं ।

सचाज्ञाननिवृत्तिरूपः । यदाह । अविद्यास्तमयोमोक्षःसासंसारउदाहृतइति । नचाज्ञानासंभवेतन्निवृत्तिरुपपद्यते । नन्वेतदज्ञानासंभवादेवेत्यनेनैववाक्येनसिद्धं । तत्किमर्थोयंग्रंथः । सत्यं । तथापितस्यैवप्रपंचोयमित्यदोषः । प्रपंच नंचप्रकारांतरेणप्रयोजननिरासप्रस्तावायेति । प्रकारांतरेणप्रयोजनंनिराकरोति ॥ **स्वरूपत्वान्मोक्षस्यपूर्वमेवसिद्ध त्वात्** । प्रयोजनंनिरस्तमितिसंबंधः । अज्ञाननिवृत्तिलक्षणोहिमोक्षःपरेणात्मस्वरूपतयैवेष्टः । यथाह आत्मैवाज्ञान हानिरिति । आत्मस्वरूपंचप्रागेवशास्त्रप्रवृत्तेःसिद्धमेवेतिकथंतत्प्रयोजनंस्यात् । नहिकश्चित्सिद्धस्यसाधनाययतते । नापितत्साधनार्हं । ज्ञातआत्मैवाज्ञानहानिर्नात्ममात्रमितिकश्चित् तदसत् । आत्मनोज्ञानकर्मतानंगीकारात् । वृत्तिविषय तास्तीतिचेत् । तथापिवृत्तिविशिष्टआत्मामोक्षइत्युक्तंस्यात् । तथाचवृत्तेर्निवृत्तौमोक्षनिवृत्तिप्रसंगः । वृत्त्युपलक्षितआत्मामो क्षइतिचेत् । तथापिजीवन्मुक्तौप्रसंगइत्येषादिक् । अपरआह । नाविद्यास्तमयलक्षणंमोक्षमात्मस्वरूपमाचक्ष्महेकिंनामान्य मेव । नचवाच्यंतस्यसत्वेऽद्वैतहानिरसत्त्वेतदभावः सदसत्त्वंविरुद्धंसदसद्विलक्षणत्वेऽज्ञाननिवृत्तित्वानुपपत्तिःप्रतियोगितन्नि वृत्त्योर्वैलक्षण्यस्यावश्यकत्वादिति । पंचमप्रकारताभ्युपगमात् । यथोक्तं । नसन्नासन्नसदसन्नानिर्वाच्यश्चतत्क्षयः । यक्षा नुरूपोबलिरित्याचार्याःप्रत्यपीपदन्निति । तत्राह ॥ **अज्ञानासंभवेनचतुर्थप्रकाराभावात्पंचमप्रकारतापिनिरस्ता** । मोक्षस्येत्यनुवर्तते । अज्ञानस्यहिनसत्वं । अद्वैतभंगात् । नाप्यसत्वं । प्रतीतिविरोधात् । नचसदसत्त्वं । विरोधात् । अत श्चतुर्थप्रकारोऽनिर्वचनीयत्वमंगीकार्यं । नचतन्निवृत्तिरपितादृशीसंभवतीत्येवंमोक्षस्यपंचमप्रकारतापरेणांगीकृता । स्यादियं

यद्यज्ञानमेवपरमतेस्यात् । नचतत्संभवति । सिद्धत्वात्स्वरूपस्येत्यादिनातदसंभवस्योक्तत्वात् । अतोऽज्ञानासंभवेनचतुर्थ प्रकारस्यसुतरामभावात्तेनकल्प्यमानामोक्षस्यपंचमप्रकारतापिपूर्वोक्तरीत्यैवनिरस्ता । अथवाऽज्ञाननिवृत्तिर्यद्यात्मातिरिक्तापं चमप्रकारोररीक्रियतेतदावक्तव्यं । किमज्ञानकार्यनवेति । नतावद्द्वितीयः । आत्मातिरिक्तस्याज्ञानतत्कार्ययोरन्यतरत्वावश्यं भावाभ्युपगमात् । आद्येबाधकमाह । अज्ञानासंभवेनेति । यद्यज्ञाननिवृत्तिरज्ञानकार्यातदाऽज्ञानस्यतदानीमवस्था नंनस्यात् । नह्युपादानेनविनोपादेयस्यस्थितिरस्ति । अज्ञाननिवृत्तावज्ञानासंभवात् । तथाचाज्ञाननिवृत्तेरुभयथाप्यसंभवे नस्वरूपमेवनास्ति । पंचमप्रकारतातुदूरनिरस्तेति । किंचघटादीनांसत्वं । शशविषाणादीनामसत्वं । घटादीनामेवदेशकाला दिव्यवस्थयासदसत्वमितिप्रकारत्रयस्यैवानुभवाच्चतुर्थप्रकारएवनास्ति । तदभावात्पंचमप्रकारतातुमोक्षस्याष्टमरसइवात्यंतासं भाविनीत्याह । चतुर्थप्रकारेति । अज्ञानासंभवादधिकारीचनिरस्तइत्युक्तंतद्विवरणार्थमाह ॥ **विषयप्रयोजनाभावादेवा धिकारीच** ॥ निरस्तइतिसंबंधः । योहियत्प्रयोजनमर्थयमानोयंविषयंजिज्ञासतेसएवतत्राधिकारीभवति । प्रकृतेचाज्ञाना संभवेनविषयप्रयोजनेनिराकृतेइतितदभावादेवतदविनाभूतोधिकारीचनिरस्तोवेदितव्यः । अज्ञानासंभवात्संबंधाभावउक्त स्तमुपपादयति ॥ **तदभावादेवसंबंधोपि** ॥ सतामेवहिसंबंधोभवति । अज्ञानासंभवेनविषयाद्यभावश्चोपपादितः । अतो विषयाद्यभावात्संबंधोपिनिरस्तएवेति । एवंवेदादेर्जीवब्रह्मणोरेकत्वप्रतिपादकत्वेऽनारंभणीयत्वप्रसंगान्नतत्प्रतिपादकत्वमि त्युक्तं । इदानींपरमाप्ततमेनभगवताश्रुत्याचविष्णोःसर्वोत्तमत्वस्यैवसर्वशास्त्रप्रतिपाद्यतयाभिहितत्वाच्चतदेववेदादिप्रतिपाद्यं

नात्मब्रह्मैक्यमित्याह ॥ **द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच** । इमावितिप्रमाणसिद्धतांसूचयति । पुरुषौचेतनौ । एव शब्दस्यद्वावेवेतिसंबंधः । तद्घटनायपरमपुरुषंव्यावर्तयितुंलोकइत्युक्तं ॥ **क्षरःसर्वाणिभूतानिकूटस्थोक्षरउच्यते** । तदनेनोत्तमपुरुषनिरूपणस्यापेक्षितंपुरुषनिरूपणंकृतं । ततःकिमित्यतआह ॥ **उत्तमःपुरुषस्त्वन्यः** ॥ अन्यःक्षराक्षरा भ्यां । नत्वनयोरेवैकःपुरुषोत्तमःकल्प्यतइतिभावः । अन्यस्योत्तमपुरुषत्वेश्रुत्यादिसंमतिमाह ॥ **परमात्मेत्युदाहृतः** । आत्मशब्दोत्रचेतनपर्यायः । युक्तिंचाह ॥ **योलोकत्रयमाविश्यबिभर्ति** । योहियस्यभर्तासतस्मादुत्तमोयुक्तः । आविष्ट स्यतन्नाशेनाशप्रसंगइत्यतआह ॥ **अव्ययः** । तत्कथं । ऐश्वर्यादित्याह ॥ **ईश्वरः** । सचकइत्यतोहमेवेतिसप्रमाणकमाह ॥ **यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः । अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः** । क्षरंचातीतइतिचशब्दान्वयः। लोकशब्देनपौरुषेयागमउच्यते । तात्पर्यद्योतनायवेत्तुःफलमाह ॥ **योमामेवमसंमूढोजानातिपुरुषोत्तमं । ससर्ववि द्भजतिमांसर्वभावेनभारत** । एवमित्यस्यव्यावृत्तिनिरासोऽसंमूढइति । नपुनरश्वकर्णादिवत्संज्ञामात्रत्वेनेत्यर्थः । स सर्ववित् । अस्यैवसर्वशास्त्रार्थत्वात् । सर्वभावेनससर्वप्रकारेण । एतच्चनयस्मैकस्मैवाच्यमित्याह ॥ **इतिगुह्यतमंशास्त्रमि दमुक्तंमयानघ** । ससर्वविदित्याद्युक्तं । ततःकिमित्यतआह ॥ **एतद्बुध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारत** । बुद्धिमान परोक्षज्ञानी । कृतकृत्योमुक्तः । **इंद्रियेभ्यःपराह्यर्थाअर्थेभ्यश्चपरंमनः । मनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परः । महतःपरमव्यक्तमव्यक्तात्पुरुषःपरः । पुरुषान्नपरंकिंचित्सकाष्ठासापरागतिः** । आत्मामहानितिसामानाधिक

रण्यंनपरंकिंचित् । किंतुसाकाष्ठासएवावधिः । कुतएतत्सापरागतिः । गम्यतइतिगतिः । एवं सर्वशास्त्रैःप्रतिपाद्यतइत्येतत् ॥ भूम्नःक्रतुवज्ज्यायस्त्वंतथाचदर्शयति । सर्वगुणेषुभूमगुणस्यज्यायस्त्वंमुख्यतोवेदप्रतिपाद्यत्वमितिसूत्रार्थोत्राभिमतः ॥ इतिविष्णोःसर्वोत्तमत्वमेवशास्त्रार्थत्वेनभगवताश्रुत्याचाभिहितं । एवंप्रकरणार्थमुपपाद्यतस्यप्रयोजनमाह ॥ इतिसर्वज्ञमुनिनामायावादतमोखिलं । निरस्तंतत्ववादेनसतांसंशयनुत्तये । अन्यथाहिविप्रतिपत्तेःसंशयोभवति । प्रकरणार्थमुपसंहरन्तदनुगुणंभगवद्वाक्यमेवपठति ॥ नास्तिनारायणसमंनभूतंनभविष्यति । एतेनसत्यवाक्येनसर्वार्थान्साधयाम्यहं । वचनप्रसूनमालाजयतीर्थाख्येनभिक्षुणारचिता । ध्रियतांसदयेहृदयेकमलामहिलेनपुरुषेण ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितमायावादखंडनविवरणंजयतीर्थभिक्षुविरचितंसंपूर्णं ॥

अयं ग्रंथः कुंभघोणस्थमध्वविलासपुस्तकालयाधिपतिभ्यां अपशंकररामाचार्य,
टी. आर्. कृष्णाचार्यनामभ्यां मुंबय्यां निर्णयसागरमुद्रणयंत्रे
मुद्रयित्वा प्रकाशितः । शके १८१८

॥ मायावादखंडनटीकासंपूर्णा ॥